MSS No. 164 Subject Literature

Name of MSS मेघदूत टीका, मल्लिनाथीय टीका सहित

Author — —

Period — —

Folios 29 (00a-029)

Script Sanskrit

Source Prithipal Singh, Amritsar

Missing Folios Incomplete

दामोदरशारायास्यपठनार्थंलिपिकृतंकाव्यमेघदूतनामकाव्यः

Meghaduta (10)

164

सटीक अपूर्ण

मेघदूत टीका ; अपूर्ण ॥ मल्लिनाथीय टी० सहित
२८ पत्रक ॥ ल० अ० १२ पं० प्र० पृ०

ह० ल०

१

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नमः सरस्वत्यै मातापितृभ्यां जगतो नमो वामार्द्धजानये सद्योदक्षिणदृक्पातसंकुच
द्वामदृष्टये १ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवं तन्नरं वपुषि कुंजरं मुखे मन्महे किमपि तुन्दिलं महः २ शर
णं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यं करुणामसृणैः कटाक्षपातैः कुरु मामंब कृतार्थसार्थवाहं ३ इहान्व
यमुखेनैव सर्वं व्याख्यायते मया नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ४ आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मु
खमिति शास्त्रात् काव्यादौ वस्तुनिर्देशं कुर्वन् कथां प्रस्तौति कश्चिदिति स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः प्रमा
दोऽनवधानतेत्यमरः अतएवाविनाम प्रमादः ... सुसंरक्षणानित्यपादानत्वं तस्मात् ... कां
ताविरहेण गुरुणा दुर्भरेण दुःसहेनेत्यर्थः गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति विश्वः वर्षभोग्येण संवत्सरभो
ग्येन कालस्यात्यंतसंयोगे द्वितीया अत्यंतसंयोगे चेति समासः ... भर्तुः स्वामिनः शापेनास्तंगमितो महि
मा सामर्थ्यं यस्य सोऽस्तंगमितमहिमा अस्तमिति मकारांतमव्ययमस्य द्वितीयेति योगविभागात् समासः कश्चिदनिर्दिष्ट

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण
भर्तुः यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु

नामा यक्षो देवयोनिविशेषः विद्याधरोऽप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः इत्यमरः जनकतनयाः
स्नानैरवगाहनैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेष्वित्यर्थः छायाप्रधानास्तरवश्छायातरवः शाकपार्थिवादित्वा
त्समासः स्निग्धाः सान्द्राश्छायातरवो नमेरवो येषु तेषु वसतियोग्येष्वित्यर्थः स्निग्धस्तु मसृणे सान्द्रे ... नमेरुः
ति स्यादिव ... रामगिरेश्चित्रकूटस्याश्रमेषु वसतिं वसतिं ... चक्रे कृतवान् अत्र
सीताविप्रलंभस्य शृंगारः ... एवं ... आश्रमेष्वीति वदतुवयनेन सीतां
प्रति रामस्य हनुमत्संदेशं मनसि निधाय मेघसंदेशं कविः कृतवानित्याहुः ... ॥ १ ॥

राम
१

तस्मिन्निति तस्मिन्नद्रौ चित्रकूटाद्रौ अबलाविप्रयुक्तः कान्ताविरहितः कनकस्य वलयः कटकं वलयोऽस्त्रियामि
त्यमरः तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परादधः प्रदेशो यस्य तथोक्तः कक्षान्तरे प्रकोष्ठः स्यात्कूर्परा
दध इति शाश्वतः विरहदुःखात्कृशत्वादित्यर्थः कामी कामुकः कतिचिन्मासानष्टौ मासानित्यर्थः मासानन्यानामयनन्तु इति
वचनमाणत्वात् नीत्वा यापयित्वा आषाढानक्षत्रेण युक्ता पौर्णमासी आषाढी नक्षत्रेण युक्तः काल इत्यण् ॥ छ ॥ छ

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्कनकवलयभ्रंशरिक्तः प्र
कोष्ठः

दिह्वाणसिन्यदिनाडीप सास्मिन् पौर्णमासीत्याषाढो मासः सास्मिन् पौर्णमासीति संज्ञायामित्यण् तस्य प्रथमदि
वसे आश्लिष्टसानुमाक्रान्तकूटं वप्रक्रीडानुरवानकेलयः उत्खातकेलिः क्रीडाद्यैर्वप्रक्रीडा इति निगद्यते इति शा
श्वतोविना तत्परिणतेन तिर्यक्दन्तप्रहारः तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः सचासौ
गतश्चेति स इव प्रेक्षणीयं दर्शनीयं मेघं ददर्श

मे.टी.
२

न

गजर्ष्ट्रक्षणीयमित्यत्रैव स्तोयात्स्तुज्ञेयमावि विदत्राद्‌स्य प्रथमदिवसस्यत्र प्रत्यासन्नेनमसीतिवक्ष्यमाणोनामो
मासप्रत्यासन्नमात्रस्य प्रथमेदिवसइतिपाठं कल्पयंतितदसंगतं प्रथमातिरेकेकारणाभावात भोमासस्य
प्रत्यासत्त्यार्थमित्युक्तमितिचेन्न प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः गंतव्यंतप्र
त्यासत्तेरुपयोगिभावेनाविवक्षितत्वात विवक्षितत्वेवास्तवपक्षेपिप्रथमदिवसांतिकक्षणोमेघदर्शनकस्य
नाद्यासमानाभावेनतदसंभवात प्रत्युतपक्षेएवकुशलसंदेशस्य माघनष्टे प्रतीकारार्थस्यवुक्तएवानुमानमुक्तं

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं
ददर्श २

स्थितः ननु मनस्यनायं विवेक इतिचेन्न उन्मत्तस्य नामर्थस्य प्रतीकारार्थे प्रवृत्तिर्यीतिसंदेश एवमा भूत्तथा
धकाव्यारंभ एवाप्रसिद्धाः स्यादित्यहो मल्लिनाथादीयाडित्यप्रकर्षः कथं तर्हि प्रार्थयांतोमेभुजगाश्रयनादुस्थितेप्रा
ङ्गुपासावित्यादिना भवसमयोधानधिकस्य प्रायस्य माघनुष्टयावक्षिप्तस्येक्तिः दशाद्विसाधिको इतिमोल्लवय
दयेविकथंसाविंसतिदिवसैर्न्यूनत्वादितिसंतोषव्यं तस्यादी षड्दिवसमविवक्षितमितिसूक्तं प्रथमदिव

राम
२

यस्येति राजानो यक्षाः राज्ञामभीष्टपदे बंदुपदेन यक्षराजयोरिति विश्वः राज्ञां राजा राजराजः कुबेरः राजराजो धनेना
धिपः इत्यमरः राजाहःसखिभ्यष्टच् तस्यानुचरो यक्षः अंतर्बाष्पो धीरोदात्तत्वादतः संभिनाश्रुः सन् कौतुकाधा
नहेतोरभिलाषोत्पादकारणस्य कौतुकं चाभिलाषे स्यादुत्सवेन सहर्षयोरिति विश्वः तस्य मेघस्याग्रे कथमपि गा
ढीयस्य प्रयत्नेनेत्यर्थः ज्ञानहेतु विवक्षायामप्यादि कथमध्यं कथमपि स्थित्वा ध्यानं यत्नमौनवः पाठयोरित्युज
त्वः स्थित्वा चिरं दध्यौ चिंतयामास ध्यै चिंतायामिति धातोर्लिट् मनोविकारो यशाय यद्येनामिति विशेषः विकार

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतोरंतर्बाष्पश्चिरमनुचरो राजराजस्य
दध्यौ मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः कंठाश्लेषप्रणयिनि जने किंपु

हेतुमाह तथाहि मेघालोके मेघदर्शने सति सुखिनोपि प्रियादिजनसंगमसुखितेनः चित्तमन्यथावृत्ति
र्वोपारोवस्य तदन्यस्या । वृत्ति भवति विकृतिमापद्यत इत्यर्थः कंठाश्लेषप्रणयिनि कंठालिंगनार्थि
जनि जने दूरे संस्थिते तथैव सति किंपुनर्विरहिणः किमुत वक्तव्यमिति भावः विरहिणां मेघसंद
र्शनमुद्दीपनं भवतीति भावः अर्थांतरन्यासोऽलंकारः तदुक्तं दंडिना ज्ञेयः सोऽर्थांतरन्यासो वस्तु प्रस्तुतवि
तनेन तत्साधनसमर्थस्य न्यासोन्यस्य वस्तुन इति ॥ ३ ॥

मे. टी.
३

थयत्समाहितात्मा करणेः सनकिं कृतवानित्यत आह प्रत्यासन्न इति। स यक्षो यस्मिन्नर्थे दघ्यौ स इत्यर्थः। नभसि श्रावणे
नभः श्रावणो नभस्यश्चेत्यमरः। प्रत्यासन्ने आषाढस्यानन्तरं सन्निकृष्टे सतीत्यर्थः। दयिताजीवितालंबनार्थी सन्
वर्षाकालस्य विरहदुःखजनकत्वादुत्पन्नप्रतीकारार्थं नार्थी दनर्थीत्यपि प्रतिबंधप्रवर्द्धमितिन्यायेन प्राणेव
प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः। जीवनस्योदकस्य मूलः पदं वधो वस्त्रबंधो जीमूतः। एषोदरादित्वा
न्नाधु इति मूलः स्यात्पबंधेयो निरूढः। तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वयं क्षेमप्रधानां प्रव
त्तिं वार्त्तां वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः। हारयिष्यन् प्रापयिष्यन् लट्शेषे चेति चकारात् क्रियार्थक्रियोपपदाल्लट् प्र
त्ययः। जीवनार्थीकर्मजीवनपदेनैव कर्त्तव्यमिति भावः। हृक्रोरन्यतरस्यामिति कर्मसंज्ञाया विकल्पात् पक्षे कर्त्तरि

प्रत्यासन्ने नभसि दयिताजीवितालंबनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४

त्तरीयाप्रत्ययैरभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः कुटजो गिरिमल्लिकेति हलायुधः। कल्पितार्घाय कल्पितानु
ष्ठितोर्घः पूजाविधिर्यस्मै तस्मै मूल्ये पूजाविधावर्घ इत्यमरः। तस्मै जीमूताय क्रियाग्रहणमपि कर्त्तव्यमिति संप्रदा
नत्वात् चतुर्थी। प्रीतिप्रमुखवचनेति प्रीतिपूर्वकाणि वचनानि यस्मिन् कर्मणि तत् प्रीतिप्रमुखवचनं यथा तथा॥
प्रोः मनमानं स्वागतं स्वागतवचनं प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छेत्यर्थः। नाथेन न लत्वं प्रत्यासन्नेन भसीति स
माधानेन प्रत्यासन्नेन भसीति साधीयान् पाठः। कुल्पितः प्रत्यासन्नेन भसीति मापनेन सतीत्यर्थः। वस्तुतस्तु नैव पूर्वपाठ

रा.म
३

नुचेतनसाध्यमर्थं कथमचेतनेनेनकारयितुंप्रवृत्तइत्याशंक्यकविःसमाधत्तेधूमेतिधूमश्चज्योतिश्चसलिलंचम
रुतश्चतेषांसन्निपातःसंघातोमेघःक्वचेतनत्वात्संदेशानहिइत्यर्थः पटुकरणैःसमर्थेन्द्रियैःकरणंसाधकतमं
क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः प्राणिभिश्चेतनैः प्राणीतुचेतनोजन्मीत्यमरः प्रापणीयाःप्रापयितव्याःसंदिश्यन्तइ
तिसंदेशास्तएवार्थाःक्वइत्येवमौत्सुक्यादिष्टार्थोद्युक्तत्वात्इष्टार्थोद्युक्तउत्सुकइत्यमरः संप्रदानत्वात

धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघः संदेशार्थाःक्वपटुकरणैः प्राणिभिः प्रापणी
याइत्यौत्सुक्यादपरिगणयन्गुह्यकस्तंययाचे कामार्त्ताहिप्रकृतिकृपणाश्चे
तनाचेतनेषु ॥५॥

कुशलप्रश्नेनेनामिष्टुतीचकारइत्यर्थः अपरिगणयन्विचारयन्गुह्यकोयक्षस्तंमेघंययाचेयाचितवान्याच
याञ्चायांतथाहिकामार्त्ताः मदनातुराश्चेतनाश्चाचेतनाश्चेतनेषुविषयेप्रकृतिकृपणाःस्वभावदीनाःकामांधा
नांयुक्तायुक्तविवेकशून्यत्वाच्चेतनयाञ्चानविरुद्धेत्यर्थः अत्रमेघसंदेशयोर्विरूपयोर्घटनाद्विषमालं
कारः तदुक्तम् विरूपकार्यस्योत्पत्तिरपरस्यानर्थस्यवाभवेत् विरूपघटनाचासौविषममलंकृतिः स्त्रियांसाया

संप्रतियांचाप्रकारमाह जातमिति हेमेघत्वां भुवनेषुविदिते भुवनविदिते निष्ठेतिप्रत्यार्थेकः गतिबुद्धित्यादिवर्त्तमा
नार्थेत्वे विधिक्तस्य च वर्त्तमाने इति भुवनेशब्दस्य च ष्यतेनाभिधमानसमासोनस्यात्तेन च षष्ठ्यायामिति निषेधात् पुष्करा
वर्त्तकाख्यकेचिन्मेघानां प्रोक्षसौ वंशेजातं महाकुलप्रसूतमित्यर्थः कामरूपमिच्छाधीनविग्रहं गुणादिसंपा
दत्तमित्यर्थः मघोनइंद्रस्य प्रकृतिपुरुषं जानामि तेनत्वत्प्रभुत्वादिजानामित्यादिगुणयोगित्वेनहेतुना विधिवशा
द्दैवायत्तत्वात् विधिर्विधाने दैवेचेत्यमरः वशामायत्तेवशो मिच्छाप्रभेदयोरिति विश्वः दूरेबंधुर्यस्य स दूरबंधुः विप्रल

जातंवंशेभुवनविदितेपुष्करावर्त्तकानांजानामित्वांप्रकृतिपुरुषंकामरूपंमघोनः तेना
र्थित्वंत्वयिविधिवशाद्दूरबंधुर्गतोहंयाच्ञामोघावरमधिगुणेनाधमेलब्धकामा ॥ ६ ॥

भार्योहंत्वय्यर्थित्वंगतः याचकस्य याच्ञागुणोत्कर्षज्ञोपपद्यत इत्याशंक्य दैवायात्वामंगेपिलाघवदोषाभावएवोप
योगइत्याह याच्ञेतितथाहि अधिगुणेऽधिकगुणे पुंसि गुणैर्विषये याच्ञामोघानिःफलापिवरमिषत्प्रियंद
नगुणाढ्यत्वात्प्रियत्वंयाचविफल्यादिबअप्रियत्वमितिभावः अधमेनिर्गुणेयाच्ञालब्धकामापिनवर
मीषत्प्रियमपिनभवतीत्यर्थः दैवाद्दतेवरः श्रेष्ठेत्रिषुक्लीबंमनाग्विकप्रियमित्यमरः अर्थान्तरन्यासाप्राणि
वः प्रेयोलंकारः लदुक्तं दंडिनाप्रियः प्रियतराख्यानमिति एतदाद्यपादत्रयेचतुर्थपादेनार्थान्तरन्यासेनोपजीवितमि

श्रीरामजी ॥ ॐ ॥

संतप्तानामिति हे पयोद त्वं संतप्तानां आतपेन वा प्रवासविरहेण वा संज्वरितानां संतापः संज्वरः समावित्यमरः शरणं पयोदानेनात
पथिकानां प्रोषितानां च रक्षणस्य स्वप्रेरणया यक्षको शरणं गृहरक्षित्रोरित्यमरः तत्तस्मात्कारणाद्धनपतेः कुबेरस्य क्रोधे
न विश्लेषितस्य प्रियया वियोजितस्य मे मम संदेशं वार्त्तां प्रियायाः हर प्रियां प्रापय नयेत्यर्थः संबंधसामान्ये षष्ठी संदेश
हरणेनाव्योः संतापं नुदेत्यर्थः कुत्र स्थाने सा स्थिता तत्स्थानं किं कस्य का वा सा नत्राह गंतव्येति वसतिर्भवं वा इयं वाहिर्दे

संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य गंतव्या ते वसति
रलका नाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ॥ ७ ॥ राम

व पंचजनेभ्यस्त्वेत्यण वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चंद्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि
यस्यां तादृश्योक्ता हर्म्यादि धनिनां वास इत्यमरः अनेन त्वया वर्तयमुक्तं अलका नामालकेति प्रसिद्धा यक्षेश्वराणां व
सतिः स्थानं तेन वगंतव्या त्वया गंतव्येत्यर्थः कृत्यानां कर्त्तरि षष्ठी ॥ ७ ॥ राम घढ

मद्दर्थे प्रवृत्तस्य ते पथिकांगनानामाश्वासनमानुषंगिकं फलमाह त्वामिति पवनपदवीमाकाशमारूढं त्वां पंथा
नं गच्छंतीति पथिकाः पथिकानां वनिताः प्रत्ययः तेषां वनितानां प्रोषितभर्तृकाः प्रत्ययात्प्रियागमनविश्वासात् प्रत्ययो
ऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः आश्वसंत्यो विश्वसिताः श्वसिधातोः शत्रंताद्उगितश्चेति ङीप् उद्गृहीता

त्वामारूढं पवनपदवीमुद्गृहीतालकांताः प्रेक्षिष्यंते प
थिकवनिताः प्रत्ययादाश्वसंत्यः कः संनद्धे विरह
विधुरां त्वय्युपेक्षेत जायां न स्यादन्योप्यहमिव जनो यः
पराधीनवृत्तिः ॥ ८ ॥

लकांताः दृष्टिःप्रसादार्थमुन्नमय्योद्धृतालकाग्राः सत्यः प्रेक्षिष्यंते अत्युत्कटतया द्रक्ष्यंतीत्यर्थः तथाहि त्वयि सन्न
द्धे व्यापृते सति विरहेण विधुरां विवशां जायां कः उपेक्षेत न कोपीत्यर्थः अन्योपि मद्व्यतिरिक्तो वियोजनोऽहमिव पराधीन
वृत्तिः परायत्तजीवको न स्यात् स्वतंत्रस्तु न कोप्युपेक्षेतेति भावः इत्यर्थांतरन्यासः ॥ ८ ॥

निमित्तान्यपि ते शुभानि दर्शयन्नित्याह मंदं मंदमिति। अनुकूलः पवनो वायुस्त्वां मंदं मंदमिति मंदमित्यर्थः। अप्रकर्षे द्विरुक्ता
यामेव द्विरुक्तिः। नित्यवीप्सयोः प्रकारे गुणवचनस्येत्येतदाम्रेडितानुवृत्तौ मेघार्थवद्भावेऽपि तु किं मंदमंदमिति स्यात्। तदेवाह वामनः
मंदमंदमित्याप्रकारार्थे द्विर्भाव इति। पुष्पासु दृष्टा मा विफला नु तवेत्यर्थः। यथासादृश्ययोग्यत्ववीप्सापदार्थानतिक्रम इति याद
वः। नुदति प्रेरयति। अयं सगंधः सगर्वः संबद्ध इति केचित्। गंधो गंधक आमोदे लेशे संबंधगर्वयोरित्युभयत्रापीति विश्वः। ते
तव वामो वामभागस्थः। वामस्तु वक्रे रम्ये स्यात् सव्ये वामोऽपि वेति शाश्वतः। एष चातकः पक्षिविशेषो मधुरं श्राव्यं नदति व्याहर
ति इदं निमित्तद्वयं पवर्तनेवनैष्यवायदं। निमित्तान्तरमाह गर्भेति। गर्भः कुक्षिस्थो जंतुः गर्भोपवरके इत्यन्तेः सुरवेयनमके ठके कौकु

मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वां वामश्चायं नदति मधुरं चातकस्ते सगर्वः। गर्भा
धानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥ ९॥

क्षिस्थजंतौ चेति यादवः। तस्याधानमुत्पादनं तदेव क्षणमुत्सवः सुखहेतुत्वादिति भावः। निर्व्यापारस्थितौ कालविशेषोत्सव
योः क्षणः इत्यमरः। तस्मिन् परिचयादभ्यासाद्धेतोः खे व्योम्नि आबद्धमालाः गर्भाधानसुखार्थं त्वत्समीपे बद्धपंक्तय इत्यर्थः।
उक्तं च कर्णोदये गर्भं बलाका दधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तादिति। बलाका बलाकांगना नयनसुभगं दृष्टि
प्रियं भवन्तं नूनं सत्यं सेविष्यन्ते। अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शाकुनशास्त्रे दृष्टं

मे॰ टी॰
६

न चेत्तस्या नाशात्तत्सख्यलनाद्वा निरर्थकस्तव प्रयास इत्याह तां चेति हे मेघ दिवसानामवशिष्टदिनानां कुबेरशापदुःखविरत
दिनानां गणनायां संख्याने तत्परामासक्तां तत्परे प्रसितासक्ताविन्यमरः अनन्यवृत्तिमव्यापन्नाममृतां शापावसाने मदागम
नप्रत्याशया जीवन्तीमित्यर्थः एकः पतिर्यस्याः सा एकपत्नी तां पतिव्रतामित्यर्थः नित्यं सपत्न्यादिष्विति ङीप् नका
रश्च भ्रातुर्जायां मातृवन्तिः प्राक्कं दर्शनीयामित्याशयः तां मन्त्रियामविहतगतिरविच्छिन्नगतिः सन्नवश्यं द्रक्ष्यसि अ

तां चावश्यं दिवसगणनातत्परामेकपत्नीमव्यापन्नामविहत
गतिर्द्रक्ष्यसि भ्रातृजायाम् आशाबंधः कुसुमसदृशं प्रायशो ह्यं
गनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

लोकयिष्यते तथाहि आशा आशंसितस्मा आशा दिगतितृष्णयोरित्यादवः बध्यतेनेनेति बंधनं वृन्तमित्यावत् आशै
वं बधः आशाबंधः कर्त्री प्रायेणापि प्रेमयुक्तं अत एव कुसुमसदृशं सुकुमारमित्यमरः अर्थः अत एव वियोगे विरहे
सद्यःश्याति सद्यो भ्रंशनशीलमंगनानां हृदयं जीवितेचित्ते वा तस्या रूतनयो रितिशाश्वतो वे प्रायशः प्रायेण रुणद्धि प्रतिब

१

राम
६

संप्रतिसहायसंपतिष्यन्तीसहा कर्त्तुमिति यद्गर्जितंकर्तृमहीमुच्छिलीध्रामुद्गतकंदलीकांतदल्यांचशिलीध्रैःस्यादिति शाश्वतः
वेऽन्त एवावंध्यां सफलां कर्त्तुं प्रभवति शक्नोति शिलीध्राणामविर्भावस्य संपन्निस्फुचकत्वादिति भावः तदुक्तं निमित्तनिदाने
कालाभ्रयोगादुदिताशिलीध्रासंपन्नसस्यां कथयन्ति धात्रीमिति तत् श्रवणसुभगं श्रोत्रसुखं श्लोकस्येतिशेषः तेन च गर्जि
तं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सकका इति याचत उत्सकादुन्मना इति निपातात्साधुः कालान्तरे मानसस्य हिमदु

कर्त्तुं यच्च प्रभवति महीमुच्छिलीध्रामवंध्यां तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः आकैला
साद्बिसकिसलयच्छेदपाथेयवंतः संपत्स्यंते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

ष्टत्वात् हिमस्पर्शं हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धं बिसकिसलयानां मृणालाग्राणां
छेदैः सकलैः पाथेयवन्तः पथि सोढव्यं पाथेयं पथि भोज्यं पथ्यतिथ्यवसतिस्वपतेर्ढञ् नर्द्दितः मृणालाग्रसकलैः संबलवन्त इत्यर्थः
राजहंसा हंसविशेषाः राजहंसास्तु चञ्चुचरणैर्लोहितैः सितच्छदा इत्यमरः नभसि व्योम्नि भवतस्तव आकैलासपर्यन्तं पदहुप^
यैनंत सहायाः साथात्राः सहायास्तु सयात्राः स्यादिति शाश्वतः भवते संपत्स्यन्ते संभविष्यन्ते ॥ ११ ॥ =

मे॰टी॰
८

आपृच्छस्वेति प्रियं सखायं प्रियसखं चैनमाह: सखिमप्यपृच्छ जितिटक्षमा सांनातुंगमुन्नतं पुंसां वंद्यैः स्तुदैः स्तवनीयैः रघुपतिपदैः रामपादन्या
सैर्मेखलासु कटकेषु अग्रपमेखलाग्रो नितंब्यानेंद्रियकटके कटिबंधे भवबंधने उतियावद्व: आंकितं चिह्नितं इत्यर्थः सखि
त्वात्याविजत्वाच्च संभ्रमनाहं मंत्रशैलं धिगप्रहटो दृमालिंग्याप्रच्छस्व साधीयामिमं ग्रहोन संभावने आपृच्छस्वनिमित्तं इत्यर्थः

आपृच्छस्वप्रियसखममुंतुं
गमालिंग्यशैलं वंद्यैः पुंसां रघुपतिप
दैरंकितं मेखलासु ।
कालेकालेभवतिभवतोयस्यसंयो
गमेत्यस्नेहव्यक्तिश्चिर
विरहजंमुंचतोबाष्पमुष्णं १२

आप्रि॰ ऽयस्येनोरित्यात्मनेपदं सखित्वं निवहति काले काले प्रति प्रावृट्कालेषु तत्समागमनकालश्च काल शब्देनोच्यते बास्मा
यं हि स्नेहव्यक्तिः भवतः संयोगं संपर्कमेत्य चिर विरहजमुष्णं बाष्पं मूषाग्निजं निजजलेषबाष्पो ग्नेमलोष्मको रिति विस्मय: सुवंतोय
स्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति सधाने हि विरहसंगतानां बाष्पपातो भवतीति भाव: ॥ = ॥ १२ ॥ = ॥

राम
८

संप्रतितस्यमार्गंकथयतिमार्गमितिहेजलदतावदितिकथयतोमत्तउत्तिशेषःत्वत्प्रयाणस्यानुरूपंत्वन्मार्गमध्यानंमार्गमार्गमपदेमास्मिसो।
प्यदेत्र्येवमवेध्वनिरूपितियादवःश्रणुतदनुमार्गश्रवणानंतरंश्रोत्राभ्यांपर्यंतानाहैमनितंस्ययोश्रोत्रमिल्यर्थःपेयमहणात्संदेशा
त्मामात्मसामर्थ्यात्मतेमेसंदेशंवाचिकंसंदेशवागवाचिकंस्यादित्यमरःश्रोष्यसियत्रमार्गेखिन्नःखिन्नोभीक्ष्णंक्षीणबलःसन्नित्यर्थीस्ययोरिति

मार्गंतावछ्रुणुकथ
यतस्त्वत्प्रयाणानुरूपंसंदे
शंमेतदनुजलदश्रोष्यसिश्रोत्रपेयं खिन्नःखिन्नः
शिखरिषुपदंन्यस्यगंतासियत्र
क्षीणःक्षीणःपरिलघुपयःस्रोतसांचोपभुज्य १३

नित्यार्थीद्विर्भावःशिखरिषुपर्वतेषुपदंन्यस्यनिःक्षिप्यपुनर्बललाभार्थंकदिप्येत्यर्थःक्षीणःक्षीणःक्षीणासांकृशीभूतःसन्
गन्त्रापिक्षुदेतत्वात्सर्वविदितःक्लिःश्रोतसांपरिलघुपर्यायेगारुत्वदोषरहितकपलास्फालनखेदितत्वात्पथ्यमितिभावःतथाचवाग्भ
ट्टःनफ्लास्फालनोक्षेपविच्छेदितैःखेदितोदकाःहिमवन्मलयोद्भूताःपथ्यास्तनोमवत्यमूरितिपयःपानिपभुज्यशरीरखेदोपशमनार्थमभ्यवहृत्यसं

॥ ८ ॥

मे॰टी॰
८

अद्रेरिति पवने हि अद्रेः शिखरस्य कूटस्य शृंगं हरति किं स्वित् किं स्विदिति विकल्पवितर्कार्थे इत्यादिषु पठनात् प्रतिशंकया उन्मुखीभिरुन्नतमुखीभिः
स्वांगावोपसर्जनाद् संयोगो यथादिति ३ पम मुग्धाभिर्मूढाभिः मुग्धः सुंदरमूढयो रित्यमरः सिद्धानां देवयोनिविशेषाणामंगनाभिः य
कितचकितं यथा कितं प्रकारं यथा तथा प्रकारे गुणवचनस्येति द्विर्भावः दृष्टोत्साह दृष्टोद्योगः सन् सरसा आर्द्राः निचुलाः स्थलवेतसा यस्मिंस्तस्मा
त्स्थानान्निरेक विमेदेस्यान्निचुलः स्थलवेतसे इति शब्दार्णवे अस्मात्स्थानादाश्रमात् स्थित्वा मार्गे दिङ्नागानां दिग्गजानां स्थूला ये हस्ताः करास्तेषामव
लेपानाक्षेपान्परिहरन् हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपीति विश्वः अवलेपस्तु गर्वे स्यात्लेपने दूषणेपि चेति विश्वः उदङ्मुखः सन् अत्र काया

अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्च
कितचकितं मुग्धसिद्धांगनाभिः स्थानादस्मात्सरसनिचुलादुत्पतोद
ङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावले
पान् ॥ १४ ॥

उदीच्यत्वादित्याशयः खमाकाशं प्रत्युत्पत अत्रेदमपि प्रार्थ्यं निरंधनयति रसिको निचुलो नाम महाकविः कालिदासस्य सहायाध्याप
उदीच्यत्वादित्याशयः ... सम अवलेहरतीति हेतुना शि
राव्वदिनानां कालिदासप्रबंधदूषणानां परिहर्ता ... स्थानेन तस्थानादुन्मुखो निर्दिष्टोत्वादुन्नतमुखः सम
हेमहाकविभिरंगनाभ्यां दृष्टोत्साहः सन्नवत्त्यस्य ... प्रबंधमात्मानं वा प्रतिकवि रूढ्वा रितिसर्गनोदोषगुणं भवतीति तेन चाये न
मनाशयेयि स्थित्वा निचुलनिचुलं निचुलंतमात्मानं आरद्भतसिंधुवेगादित्यादिलक्षणो काने मीनां तस्य कविनिचुलं चेत्याह १४

राम
८

रत्नेति रत्नछायानांपद्मरागादिनांमणीनांप्रभानांव्यतिकरोमिश्रणमिवप्रेक्षंदर्शनीयमाखंडलस्येंद्रस्यधनुः खंडमेतदितिव
स्तुनिर्देशोविवक्षितः पुरस्तादग्रेवल्मीकाग्राद्वामलूरविवरात् वामलूरस्त्रनाकुस्त्रवल्मीकंपुन्नपुंसक मित्यमरः

रत्नछायाव्यतिकरइवप्रेक्ष्यमे
तत्पुरस्ताद्वल्मीकाग्रात्प्रभवति
धनुः खंडमाखंडलस्य ये
नश्यामंवपुरतितरांकांति
मापत्स्यतेतेबर्हेणेवस्फुरित
रुचिनागोपवेषस्यविष्णोः॥१५

प्रभवतिआविर्भवति येनधनुः खंडेनतेतवश्यामंवपुः स्फुरितरुचिनाउज्वलकांतिनाबर्हेणपिछेनपिछंबर्हेनपुंस
कमित्यमरः गोपवेशस्यविष्णोर्गोपालस्यकृष्णस्यश्यामंवपुरिवातितरांकांतिंशोभामापत्स्यतेप्राप्स्यते १५

मे॰टी॰
१६

त्वयीति कृषेर्हलकर्मणः फलं सस्यं त्वयि अधिकरणविवक्षायां सप्तमी आपन्नमधीनं अधीनो निघ्न आपन्न इत्यमरः इति
हेतोः प्रीत्या स्निग्धैः स्नेहार्द्रैः ...रित्यर्थः भ्रूविकाराणां भ्रूविलासानामनभिज्ञैः पामरत्वादिति शेषः जनपदवधूनां प
ल्लीयोषितां लोचनैः पीयमानः सत्क्षादरं वीक्ष्यमाणः मालमालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलं मालमुन्नतभूतलमित्युत्पलदा
णः सद्यस्तत्कालमेव सीरैर्हलैः कर्षणेन सुरभि घ्राणतर्पणं पथ्यानयो आरुह्य तत्राभिवृष्टेत्यर्थः सुरभिर्घ्राणतर्पण इत्यमरः

त्वय्यापन्नं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः
सद्यः सीरोत्कर्षणसुरभि क्षेत्रमारुह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण १६

किंचित्पश्चाद्व्रज गच्छ लघुगतिः क्षेत्रनिर्वृष्टत्वात् क्षिप्रगमनः सन् लघु क्षिप्रमरं द्रुतमित्यमरः भूयः पुनरपि उत्तरेणैव
व्रज तृतीयायां विधाने प्रकृत्यादिभ्य उपसंख्यानात्तृतीया पथ्या कश्चिद्धृद्वल भाविति: कुत्रचित्क्षेत्रे कलत्रे गृहे
विहृत्य देवं शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः दाक्षिण्यभंगभयान्नीचमार्गेण निर्गत्य पुनः स
बंध्यस्त्वं संचरतीति तद्दयितध्वनिः १६

राम
१६

त्वामिति ॥ आम्राश्चूताः कूटेषु शिखरेषु यस्य स आम्रकूटो नाम सानुमान्पर्वतः ॥ आम्रश्चूतो रसालः स्यादित्यमरः ॥ कूटोऽस्त्री शिखरं शृङ्गमित्यमरः ॥ आसारो धारावृष्टिः धारासंपात आसार इत्यमरः तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं तथोक्तं उपकारिणमित्यर्थः ॥ अध्वश्रमेण परिगतं प्राप्तं त्वां साधु सम्यङ् मूर्ध्ना वक्ष्यति वोढा वहेर्लट् तथाहि क्षुद्रः कृपणोऽपि दरिद्रः कृपणोऽल्पः इत्यमरः ॥ इति

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमप

रिगतं सानुमानाम्रकूटः न क्षुद्रोऽपि प्रथमसुकृतापेक्षया

संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

यादवः ॥ संश्रयाय संश्रयणाय मित्रे सुहृदि ॥ अथ मित्रं सखा सुहृदित्यमरः ॥ प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्वोपकारापेक्षया विमुखो न भवति यस्तथा तेन प्रकारेणोन्नतः स वा आम्रकूटः अभिमुखो भवतीति किं वक्तव्यं एतेन प्रथमावसथे सौख्यलाभात्कार्यसिद्धिरस्तीति लक्षयित्वं तदुक्तं निमित्तनिदाने प्रथमावसथे यस्य सौख्यं तस्याखिलेष्वपि स्थितं भवतीत्यत्रापरमन्यथा लभ्यमंधुवमिति १७

मे॰टी॰
१०

छन्नेति हे मेघ परिणतैः पक्वैः फलैः द्योतंते इति तथोक्तैः आम्राः चूतवनवृक्षाः फलंति पर्यंते च मेघवात्मेनैत्याशयः काननाम्रैर्वनवृक्षैः ।
छन्नोपान्तः आवृतपार्श्वोचलः आम्रकूटाख्यः स्निग्धवेणीसवर्णे मसृणकेशबंधच्छायेः श्यामवर्णे इत्यर्थः वेणीतु केशबंधे जलस्रुतौ या
दवः त्वयि शृंगं शिखरमारूढे सति यस्यच भाविम मावलत्यामिति सप्तमी मध्ये श्यामो मध्यादन्यत्र शेषे विस्तारे पांडुः हरिणः

छन्नोपांतः परिणतफलद्योतिभिः काननाम्रै
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां ॥
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपांडुः १८

हरिणः पांडुरः पांडुरिमरः भुवः स्तन इवामरमिथुनानां खेचराणामिति भावः प्रेक्षणीयां दर्शनीयामव
स्थान्नूनं यास्यति मिथुनग्रहणं कामिनामेव स्तनत्वेनोत्प्रेक्षासंभावनीति कृतं यथा पथिकोतः कश्चित्कामिका १०
मिनीनां कुचवत्स्तशेवीक्षीतः सन्नस्पिति नद्धवानयिच्छनोनापि कायाः स्तनोद्भुतिधनिः ॥ १८ ॥राम
राम

स्थित्वेति हे मेघ वनेचरंतीति वनेचराः तत्पुरुषे कृति बहुलमिति बहुलग्रहणादलुक् तेषां वध्वः भिल्लांगनास्ताभिर्भुक्ता लतागृहा यस्मिन् त-
स्मिन् निकुंजः कुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः तत्र तेन तत्र विनोदोस्तीत्यर्थः तस्मिन्नाम्रकूटे मुहूर्तमल्पकालं मुहू-
र्तमल्पकाले स्याद् घटिकाद्वितयेपि चेति शाश्वतः स्थित्वा न तु चिरं कार्यविरोधादिति भावः विश्रम्येत्यर्थः तोयोत्सर्गेण त्वमासारल-
घुत्वं वर्षेण द्रुततरगतिर्लाघवादिति शीघ्रतरगतिः सन् तस्मादाम्रकूटात्परं अनंतरं तत्परं वर्त्म मार्गं तीर्णस्तीर्त्वा इति क्तांतः उप-
लैः पाषाणैर्विषमे विंध्यस्याद्रेः पादे विंध्यप्रत्यंतपर्वते पादाः प्रत्यंतपर्वता इत्यमरः विशीर्णां समंततो विसृमरां एतेन क-

स्थित्वा तस्मिन्वनचरवधूभुक्तकुंजे मुहूर्त्तं तोयोत्सर्गाद्द्रुततरगतिस्तत्परं वर्त्म तीर्णः रेवां द्रक्ष्यस्युपल
विषमे विंध्यपादे विशीर्णां भक्तिच्छेदैरिव विरचितां भूतिमंगे गजस्य १९

स्याश्लिष्टा मुक्ता प्रियतम वर्षेणापातो पि ध्वन्यते रेवां नर्मदां रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका इत्यम-
रः गजस्यांगे शरीरे भक्तयो रचनाः रेखा इति यावत् भक्तिर्निर्मंत्रणे भागे रचनायामिति व्याख्याने विन्या-
सच्छेदैर्भंगीभिः ताभिर्विरचितां भूतिं शृंगारमिव भासितामिव भूतिर्मातंगशृंगारे जातौ भस्मनि संप-
दीति विश्वः द्रक्ष्यसि अयमपि महान्नयनकौतुकलाभ इति भावः १९

मे॰टी॰ तस्याइति हे मेघ वांतवृष्टिरुद्गीर्णवर्षः सन् त्वं वमनस्य व्यस्पतेति तिक्तः सुगंधिभिर्मिश्रितकरसवद्भिः स्यानिक्तो रसे सुगंधे
११ चेति विश्वः वनगजमदैर्वासितं सुरभितं भावितं महिमहिंध्यमलयागजानां प्रभवा इति विंध्यस्य मजप्रभवत्वादिति मा
वः जंबैः प्रतिहतरयं प्रतिबद्धवेगं श्रवयेयमित्यर्थः तस्याः रेवायास्तोयमादायगच्छेत्त्वं जः हे घन मेघ अंतः सारोतले

तस्यास्तिक्तैर्वनगजमदैर्वासितं वांतवृष्टि
र्जंबूकुंजप्रतिहतरयं तोयमादाय गच्छेः
अंतःसारं घनतुलयितुं नानिलः शक्ष्य
ति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय २०

वस्य जं त्वामनिलो वायुः तुलयितुं न शक्ष्यति शक्तो न भविष्यति तथा रिक्तो निःसारः शून्यः सर्वो विलघुर्भवतीत्य ११
र्थः पूर्णता सारवत्ता गौरवाय प्रकर्षाय भवतीत्यर्थः आदौ वमनशोधितस्य पुंसः श्लेष्मप्रशमनाय लघुतिक्तक राम
षायाबुपाना लब्धबलस्य वा तत्प्रकर्षो तस्यादिति २०

नीपमिति। सारंगा मतंगजाः कुरंगा वा भृंगा वा। सारंगाश्चातके भृंगे कुरंगे च मतंगजे इति विश्वः। अर्धरूढैरर्धोद्गतैः के
सरैः किंजल्कैः हरितं पलाशवर्णं पलाशो हरितो हरिदित्यमरः। हरितं च तत् कपिशं च श्यामः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते इत्यम
रः। श्याववर्णमित्यार्थ्याः यावत्। वर्णो वर्णेनेति समासः। नीपं स्थलकदंबकुसुमं स्थलकदंबके नीपं इति शाश्वतः। दृष्ट्वा संप्रेक्ष
विदित्वेति यावत्। अनुकच्छं कच्छेषु अनूपेष्वनेकच्छं अव्ययं विभक्त्यर्थे अव्ययीभावः। जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इ
त्यमरः। आविर्भूता प्रथमा प्रथमोत्पन्ना मुकुला यासां ताः। कंदलीः भूमिकंदलीः कंदली द्रोणपर्णी स्निग्धकंदा कंदलोद्भवे

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढैराविर्भूतप्रथममुकुलाः कंदलीश्चानुकच्छं दग्धा
रण्येष्वधिकसुरभिं गंधमाघ्राय चोर्व्याः सारंगास्ते जललवमुचः सूचयिष्यंति मार्गं

२

भूमिकंदली पीतिप्राण्यार्णवे जग्ध्वा भक्षयित्वा अदो जग्धिरिति जग्धादेशः। अरण्येषु अधिकसुरभिमिति
घ्राणतर्पणं गंधारण्येष्विति पाठे गंधमित्यधिकविशेषणं सामर्थ्यात्। कंदलीश्च दृष्ट्वैवेत्यन्वयो द्रष्टव्यः। उर्व्या
भूमेर्गंधमाघ्राय जललवमुचो मेघस्य मार्गं सूचयिष्यंति अनुमापयिष्यंति यत्र यत्र वृष्टिकार्यं नीपकुसुमादि
कं दृश्यते तत्र तत्र अन्वयाद् वृष्टिः कार्येति अनुमीयत इत्यर्थः। २१

मे॰टी॰
१२

॰अंभ इति प्राग्रिमसमपि व्याख्यापते अंभोविंदूनां वर्षोदविंदूनां ग्रहणे सर्वसहाय तिनमंभुचातकस्पा हितं म्रसग्रहणोद
कस्य स्पते वांशोगहेन त्वादंनवालेरावलोकरे वनराश्चातकोन्वाक्षमाणाकीनकात्यस्यंतः श्रेणीभूताविद्रुपंक्तो अम

अंभोविंदूग्रहण
रमसाश्चातकान्वीक्षमाणाः
श्रेणीभूतीपरिगणनयो
निर्दिशंतोवलाकाःत्वामासाद्यस्तनि
तसमयेमानयिष्यंति सिद्धाः
सोत्कंठानि प्रियसहचरी
संभ्रमालिंगतानि २२

ततश्चावेक्षिवलाकानकपंक्ती परिगननयराकाराह्वेतिह्यूतिसंख्यानेन निर्दशंतो हस्तेनालोपंतः सिद्धास्तनितसमयेत
न्तितकाले सोत्कंठाप्रकाणि प्रियसहचरीसंभ्रमेनालिंगनानि आसाद्य स्वयुग्रहणाश्लेवस्वमनुभयेत्यर्थःत्वां
मानयिष्यति वन्निमित्तत्वात्सुखलाभस्येतिभावः २२

राम
१२

उत्पश्यामीमिति हे सखे मेघ मत्प्रियार्थं प्रयातुं आकृतं त्वां द्रुतं शीघ्रमपि सत्वरं लघु क्षिप्रमरं द्रुतमित्यमरः । पिपासोः पातुमिच्छोः विपातेस्सन्नंतादुप्रत्ययः ते
तव ककुभैः कुटजैः कुसुमैः सुरभौ सुगंधे ककुभः कुटजो ऽर्जुन इति शब्दार्णवे । पर्वते पर्वते वीप्सायां द्विरुक्तिः काल
क्षेपं कालस्य विलंबं नयो विलंबे वेनिदायामिति विश्वः उत्पश्यामि तर्कये देवि विलंबहेतुं दर्शयन्नाह गमनं प्रार्थयते शुक्ले

उत्पश्यामिद्रुतमपिसखेमत्प्रियार्थंयियासोः कालक्षे
पंककुभसुरभौ पर्वते पर्वतेते शुक्लापांगैः सजलनयनैः स्वागती
कृत्यकेकाः प्रत्युद्यातः कथमपिभवान्गंतुमाशुव्यवस्येत्

॥ २३ ॥

ति सजलानि सानंदबाष्पानि नयनानि येषां तैः शुक्लापांगैर्मयूरैः मयूरो बर्हिणो बर्ही शुक्लापांगः शिखावल इति
याव: केकावाणी केकावाणीमयूरस्येत्यमरः स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः मयूरवाणी
कृतातिथ्य इत्यर्थः भवान्कथमपि यथा कथंचित् आशुगंतुं व्यवस्येत् व्यवसायं कुरुत साधने लिङ् शेषे प्रथम इति

ग

मे॰टी॰
२३

पांडुइति हेमेघत्वय्यासन्नेसन्निकृष्टेसतिदशार्णानामजनपदास्सूचिभिन्नैःसूचिवत्कुसुमाग्रेषुभिन्नैर्विकासितैः केतकीकुसुमैःपा
डुछायापीतवर्णाः उपवनानांवृतयः कंटकशाखावर्णानिवेषुतेनथोक्ताःमार्गेनसांततोवृत्तिरित्यमरः तथागृहवलभुजां
काकादिग्रामपक्षीणांनीडारंभैःकुलायनिर्माणैःकुलायोनीडमस्त्रियामित्यमरः ग्रामचैत्याः ग्रामाणिचैत्यानि रथ्यावृक्षाः चैत्य.

पांडुछायोपवनवृतयःकैतकैःसूचिभि
न्नैर्नीडारंभैर्गृहबलीभुजामाकुलग्रा
मचैत्याःत्वय्यासन्नेपरिणतफलश्यामजं
बूवनान्ताःसंपत्स्यंतेकतिपयदिनस्था
यिहंसादशार्णाः २४

मायतनेबुद्धिविहारोद्यानपादपेइतिस्मृः ग्राकुलानिसंकीर्णानिनगमेषुचैत्यानिवेषुतेनथोक्ताः तथापरिणतैः पक्वैः
फलैः श्यामानिपानिजंबूवनानितैरंताःरम्याःमनवदसितेरम्येसमाप्तावंतःइष्यतेइतिशब्दार्णवे तथाकतिपयेष्वेव
दिनेषुस्थायिनोहंसायेषुतेनथोक्ताः एवंविधासंपत्स्यतेभविष्यंति ॥ २४ ॥ राम
२३

तेषामिति दिक्षु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्यास्तां लक्षणं नाम्नि चिह्नेऽपि इत्यमरः तेषां दशार्णानां संबंधिनीं राजधा
नीं तिष्ठंत्यस्यामिति राजधानी करणाधिकरणयोश्चेति ल्युट् नेष्ठागलक्षणा षष्ठी समस्यत इति वक्तव्यात् समासः
ता प्रधाननगरी प्रधाननगरी प्रधाननगरी राज्ञां राजधानी इति कथ्यते इति शाश्वतः गत्वा प्राप्य सद्यः कामुकत्व
स्य विलासिताया विलासी कामुकः कामी स्त्रीपरो रतिलंपट इति शाश्वतः अविकलं समग्रं फलं लब्धा लब्धेत्व

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः
फलमविकलं कामुकत्वस्य लब्धा तीरोपांतस्तनितसु
भगं पास्यसि स्वादु यस्मात्सभ्रूभंगं मुखमिव पयः वेत्रवत्या
श्चलोर्मि २५

येतिशेषः कर्मणि ल्युट् कुतः यद्यस्मात्स्वादु मधुरं चलाः ऊर्मयो यस्य तत् चलोर्मितरंगितं वेत्रवत्या नाम नद्याः पयः
वेत्रवत्या नाम नद्याः पयः सभ्रूभंगं भ्रूकुटिलं युक्तं दशनपीडयेति भावः मुखमिवाधरमिवेत्यर्थः तीरोपांते तटप्रांते
यत्स्तनितं गर्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि दृश्यते ऊर्ध्वमुच्चलितं कंठनासिकहुंकृतं स्तनितं मणितमल्प
योषवदेति लक्षणात् पास्यसि पिबत्वत्लट् कामिना मधुरास्वादः सुरतादतिरिच्यत इति भावः ॥२५॥

मे॰टी॰ नीचैरिति हेमेघ तत्र विदिशासमीपे विश्रामो विश्रमः खेदापनयः भावार्थे घञ्प्रत्ययः तस्य हेतुः तस्य विश्रामहेतोः विश्रा
१४ मकारणात् विश्रामार्थमित्यर्थः षष्ठी हेतुप्रयोगे इति षष्ठी विश्रामेत्यत्र नोदात्तोपदेशस्य मान्तस्यानाचमेरिति पा
णिनीयेन वृद्धिप्रतिषेधेपि विश्रामो वा इति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानात् रूपसिद्धिः प्रौढपुष्पैः प्रवृद्ध
मैः कदम्बैः नीचैराख्यः त्वत्संसर्गात् पुलकाः प्रसंजाता अस्य पुलकितमिव संजातपुलकमिव स्थितं तारकादित्वादितच्प्रत्ययः

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २६

नीचैराख्यं गिरिमधिवसेः गिरौ वसेत्यर्थः उपान्वध्याङ्वस इति कर्मत्वम् नीचैर्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियो वे
श्याः वारस्त्री गणिका वेश्या पण्यस्त्री उपजीविनीति शब्दार्णवे तासां रतिषु यः परिमलो गन्धविशेषः विमर्दोत्थे परि
मलो गन्धे जनमनोहरे इत्यमरः तमुद्गिरन्ति वा वमन्तीति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नागराणां पौराणां उद्दामानि उत्कटानि
यौवनानि प्रथयति प्रकटयति उत्कटयौवनाः विदग्धनरकान्ताः कामिनां विश्रम्भविहारार्थं कानिचिन्मार्गाणि भयान्निशीथसमये राम
येवं घनविविक्तदेशान्याश्रित्य रमयतीति ॥२६॥ १४

विश्रांत इति विश्रांतः सन् नगजनीचैर्गिरौ विनीताध्वश्रमः सन् अथ विश्रांतेरनंतरं वने अरण्ये यानद्यस्तासां तीरेषु जाता
नि स्वेदपटलानि अर्क्कद्विमात्रोल्पश्रैः नवनदीति पाठे उद्यानस्थितपाद्यत्वेन कथंभो दूर्व्वारः तेषामुद्यानानामाराममाणां संबंधी
नि यूथिकाजलकानि मागधीकुसुमस्तबकुलानि मागधी गणिका यूथिके त्यमरः कोरकजालककुसुमकुलक
लिकाकुड्मलककलिकानि तुल्यानीति हलायुधः नवजलकणैः सिंचन्नार्द्रीकुर्वन् तथा गंडयोः कपोलयोः स्वेद

विश्रांतः सन् व्रज वननदीतीरजातानि सिंचन्
उद्यानानां नवजलकणैर्यूथिकाजालकानि गंडस्वेदा
पनयनरुजाक्लांतकर्णोत्पलानां छायादानात्क्ष
णपरिचितः पुष्पलावीमुखानां २७

स्यापनयनेन स्वेदमार्जनेन या रुजा पीडा मर्दनादित्वाद्रुक् प्रत्ययः तया क्लांतानि म्लानानि कर्णोत्पलानि येषां तेषां
पुष्पाणि लुनंतीति पुष्पलाव्यः पुष्पावचायिकाः स्त्रियः कर्मण्यण् इति छात् जित्यादिना ङीप् एतासां मुखानि
तेषां छायाया अनातपस्य दानात् कांतिदानं च ध्वन्यते छायात्वनातपे कांतावित्यमरः कामुकदर्शनात् कामि
नीनां मुखे विकाशो भवतीति भावः क्षणपरिचितः क्षणं संस्पृष्टः सन् व्रज गच्छ ॥ २७ ॥

मे॰टी॰
१५

वक्रइति उत्तराशांकुवेरींदिशंप्रतिप्रस्थितस्यभवतः यस्मातउज्जयिनीमार्गोवक्रोयद्यपिदूरो यद्यपीत्यर्थः।वि
ध्यादुत्तरवाहिन्यानिर्विध्यायाःप्राग्भावेकियत्यपिदूरेस्थित्वाउज्जयिन्यादेवतायाउत्तरे पथस्ततोनिर्विध्या
पश्चिमइतिवक्रत्वंतयाप्युज्जयिन्याःविशालनगर्याःविशालोज्जयिनीसमेत्यमरःसौधानामुत्संगेषु

वक्रःपंथायदपिभवतःप्रस्थितस्योत्तराशांसौधोत्संगप्रणयविमुखोमास्मभूरुज्ज
यिन्याःविद्युद्दामस्फुरितचकितैस्तत्रपौरांगनानांलोलापांगैर्यदिनरमसेलोचनैर्वंचितोसि
२८

परिभागेषुप्रणयःपरिचयःप्रणयःस्यात्परिचयेयाञ्चायांसौहृदेपिचेतियादवः तस्यविमुखःपराङ्मुखो
मास्मभूर्नभवेत्यर्थः स्मोत्तरेलङ्चेति चकारालाशीरर्थेलुङ् नमाङ्योगेइत्यडागमप्रतिषेधातउज्जयि
न्याविद्युद्दाम्नाविद्युल्लतास्फुरितेभ्यःस्फुरणेभ्यश्चकितैर्भीतैर्लीलापांगैस्सकटाक्षैर्लोलैःपौरांगनानांलो
चनैर्नयनैःयैर्नरमसेयदितर्हित्वंवंचितःप्रतारितःस्याज्जन्मवैफल्यंभवेदित्यर्थः ॥ २८ ॥

राम
१५

संप्रत्युज्जयिनीं गच्छतस्तस्य मध्ये मार्गे निर्विन्ध्यासेवनमाह वीचिक्षोभेति हे सखे त्वं पथि उज्जयिनीपथि वीचिक्षोभेन तरंगचलनेन स्त
नितानि शब्दायमानैस्तैः विहगानां हंसानां श्रेणिः पंक्तिरेव काञ्चीगुणो यस्यास्तस्याः स्खलितेनोपस्खलितेन मंदसंस्खलिते
न सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्याः गच्छन्त्याः स्वनयाः दर्शिता प्रकटिता आवर्त्तो भ्रमः अम्भसामभ्रमरावर्तनाभिर्यस्याः स्यदावर्त्तो भ
सां भ्रम इत्यमरः निर्गता विन्ध्यान्निर्विन्ध्या नाम नदी निरादयः क्रान्ताद्यर्थे पञ्चम्येति समासः तस्याः नद्याः सन्निपत्य संगत्य रसो

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ॥
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु २८

जलमभ्यन्तरे यस्य सः अन्यत्र रसेन शृङ्गारेणाभ्यन्तरो व्याप्तो भव अंतरंगो भव सर्वथा तस्या रसमनुभवेत्यर्थः शृंगारादौ
जले वीर्ये द्रवे गुणे विषे शृङ्गे रूपे आस्वादे द्रवे रसः पारदे इति शाश्वतः ननु तत्प्रार्थनामन्तरेण कथं तत्संगानुभवो यु
ज्यते इत्यत आह स्त्रीणामिति स्त्रीणां प्रियेषु विषये विभ्रमो विलास एवाद्यं प्रणयवचनं प्रार्थनावाक्यं हि
स्त्रीणामेष स्वभावो यद्विलासैरेवानुरागप्रकाशनं न तु कंठत इति भावः २८

मे.दी.
२८

निर्विंध्याया विरहावस्थां सूचयन् नन्वमूर्णी प्रार्थयते वेणीति । प्रवेणी वेणीभूतं वेण्याकारं प्रतनु स्तोकं च सलिलं यस्याः
सा तथोक्ता वेणीभूतं केशपाशप्रा इति वैजयन्ती ते हं हंती ति सूदाः उग्रपवधुः तद्वेणः तटयोरुहा ये तरवस्तेभ्यो भ्रंशिनी
नितयोक्तैः जीर्णपर्णैः शुष्कपत्रैः पांडुछाया पांडुवर्णा प्रतनावहे सुभग विरहावस्थया पूर्वोक्तप्रकारया कार
र्श्येन प्रतीतस्य एनां यतः कालमतीत्य गतस्य प्रोषितस्य धेः तेन वशो भाग्यं सुभगत्वं सुभगासि द्वर्तेः पूर्वपदस्य चेत्यु
भयपदवृद्धिः व्यंजयंती प्रकाशयंती सा खलु सुभगो यं मगनानाकामयंते इति भावः सा पूर्वोक्ता सिंधुर्नदी निर्विंध्याख्यो

वेणीभूतप्रतनुसलिलां नामतीतस्य सिंधुः पांडुछायातटरुहतरुभ्रंशिभिः जीर्णपर्णैः सौ
भाग्यं ते सुभग विरहावस्थया व्यंजयंती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ३० ॥

नद्यां नानदे सिंधुर्देशभेदे वधौ गजे इति वैजयंती येन विधिना व्यापारेण कार्श्यं त्यजति स विधिस्त्वयैवोपपाद्यः कर्तव्य
इत्यर्थः स विधीरे कामवृष्टि रसंभोगः कादमावनिबंधनत्वात् कार्श्यस्येति भावः इयं पद्यमीमदनवृष्याक्षदमरणिरह
स्येन पनश्रीतिः प्रथममविता सेग स्ननो परसंकल्पः विचूछेदस्तनुता विषयनिवृत्तिस्त्रधाना शाउन्मादो मूर्छा मृतिरित्येको
स्मरदशा दशैव स्युरिति तेनाम नीतस्येति पाठमाश्रित्य सिंधुर्नाम नद्यंतरमिति व्याख्यानं चिंत्यं सिंधुर्नाम काश्मीरस्थः का

राम
२८

प्राप्येति विदन्तीति विदा उग्रप्रधलक्षणाः वः उदयनो वत्सदेशस्थानस्य विदा उदयनकारलक्षेप कोदत्तापिल्लादस्ययः उदयनस्य वत्स-
राजस्य कथानां वासवदत्ताहरणप्रवृत्तीनां आख्यानानां कोविदास्तज्ञा वृद्धाः ग्रामे वृद्धेषु बहुलेषु सन्ति ये तेन तान् अवन्तीति नाम्ना मस-
नपदान् प्राप्य तत्र पूर्वोक्तां सौधोत्संगप्रणयविमुखो मा स्म भूर उज्जयिन्या मनुसर प्राप्नुहि श्रीविशालां संपद्युक्तां शोभा संपत्ति य
प्राप्तलक्ष्मीदिवसप्रदः इति विश्वः विशालापुरीमुज्जयिनीमनुसर व्रज कथमिव स्थितां सुचरितफलस्वर्गोपभोगल

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालां
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकं ३१

क्षये स्वल्पीभूते सत्यल्पावशिष्टे सतीत्यर्थः गां भूमिं गतानां गौरिलावाक्स्वर्गिणी स्वर्गेत्यमरः तनूरपि भूलोकगतानां
मित्यर्थः स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तावशिष्टैः पुण्यैः सुकृतैः हृतमानीतं स्वर्गार्थान् उत्थितमेवाप्ते स्वर्गमानावसंपदा-
वादिति भावः कान्तिमत् उज्ज्वलं सारभूतमित्यर्थः एकं मुख्यादन्यत एके मुख्यान्यकेवलाः इत्यमरः दिवः स्वर्गस्य
खण्डमिव स्थितमित्युत्प्रेक्षा एतेन ज्ञातसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते ३१

मे॰टी॰
१८

दीर्घीकुर्वन्निति शिप्राया विशालायां प्रत्यूषेषु अहर्मुखेषु प्रत्यूषोहर्मुखं कल्यमावितिविश्वः पटु प्रस्फुटं मदकलं मदेनाव्यक्तमधुरं ध्वनौ नु॰
मधुरास्फुटे कलइत्यमरः सारसानां पक्षिविशेषाणां सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय इति यादवः पदा सारसानां हंसा
नां वा सारसो हंसः इति शाश्वतः कूजितं रुतं दीर्घीकुर्वन् समायतं कुर्वन्नित्यर्थः यावद्वातं शब्दानुवर्तते इति भावः तेन प्रि
ययतमस्य चाटुवाक्यानुसारित्वं च गम्यते स्फुटितानां विकसितानां कमलानामामोदे
न परिमलेन सह यामैत्री संसर्गस्तेन कषायः सुरभिः रागद्रव्ये कषायो गन्धनिर्यासे सौरभे रसे इति यादवः अन्यत्र वि
मर्दगन्धीत्यर्थः विमर्दोत्थे परिमलो गन्धे जनमनोहरे आमोदः सोऽतिनिर्हारीत्यमरः अङ्गानुकूलः सुखस्पर्शः

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुरितकमलामोदमैत्रीकषाया यत्र स्त्री
णां हरति सुरतग्लानिमङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ३२ ॥

अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहनइत्यर्थः मर्दनमिति शेषः अशिशिरत्वपरिमलविशिष्टत्वसंवाहनानीति संवाहनैर्वा
रतेषु श्रमनाशयः एतच्च विशेषणवत्त्वेति शिप्रावातमित्यत्र यथा पृथिव्या संवाहनानीमितिशिप्रानामका यस्याः नद्यास्तस्या नदी
तस्या वातः शिप्रावातः शिप्रागन्धोऽपि न घातनार्थ प्रार्थनाचाटुकारं तस्य प्रार्थनायां चाटुकं करोतीति तत्स्य प्रेमसंभवः
रतार्थं प्रियवचनमयाप्तेत्यर्थः कर्मण्यणप्रत्ययः अपकामीवलमत्रश्रस्त्रीणां सुरतग्लानिसंभोगखेदं हरतीति हरति घातुकं
